अथ सूर्यस्तुतिः। तदादावरुणध्यानम्।

विनतातनयो देवः कर्मसाक्षी सुरेश्वरः।
सप्ताश्वः सप्तरज्जुश्च अरुणो मे प्रसीदतु॥

रज्जुवेत्रकशापाणिं प्रसन्नं कश्यपात्मजम्।
सर्वाभरणदीप्ताङ्गमरुणं प्रणमाम्यहम्॥

अजाय लोकत्रयपावनाय भूतात्मने गोपतये वृषाय।
सूर्याय सर्गप्रलयालयाय नमो महाकारुणिकोत्तमाय॥

विवस्वते ज्ञानभृतेऽन्तरात्मने जगत्प्रदीपाय जगद्धितैषिणे।
स्वयम्भुवे दीप्तसहस्रचक्षुषे सुरोत्तमायामिततेजसे नमः॥

नमस्सवित्रे जगदेकचक्षुषे जगत्प्रसूतिस्थितिनाशहेतवे।
त्रयीमयाय त्रिगुणात्मधारिणे विरिञ्चिनारायणशङ्करात्मने॥

पद्मासनः पद्मकरः पद्मगर्भसमद्युतिः ।
सप्ताश्वः सप्तरज्जुश्च द्विभुजः सविता रविः ॥
कालात्मा सर्वभूतात्मा वेदात्मा विश्वतोमुखः ।
जन्ममृत्युजराव्याधिसंसारभयनाशनः ॥
प्रातर्ब्रह्मस्वरूपोऽयं मध्यान्हे तु महेश्वरः ।
अस्तमाने स्वयं विष्णुस्त्रयीमूर्तिर्दिवाकरः ॥
त्रैलोक्यैकप्रदीपाय सृष्टिस्थित्यन्तहेतवे ।
ऋग्यजुस्सामरूपाय नमः पङ्कजबन्धवे ॥
भानो भास्कर मार्ताण्ड चण्डरश्मे दिवाकर ।
आयुर्विजयसम्पत्तिमिष्टं देहि नमोऽस्तु ते ॥
मित्ररविसूर्यभानुखगपूषहिरण्यगर्भमरीच्यादित्यसवित्रर्कभास्क-
रेभ्यो नमः। छायासंज्ञासमेतश्रीसूर्यनारायणस्वामिने नमः॥

मूर्तित्वे परिकल्पितः शशभृतो वर्त्मोऽपुनर्जन्मना-

मात्मेत्यात्मविदां क्रतुश्च यजतां भर्तामरज्योतिषाम्।

लोकानां प्रलयोद्भवस्थितिविभुश्चानेकधा यः श्रुतौ

वाचं नः स ददात्वनेककिरणस्त्रैलोक्यदीपो रविः॥

वेदीमध्ये ललितकमले कर्णिकायां रथस्थः

सप्ताश्वोऽर्कोऽरुणरुचिवपुः सप्तरज्जुर्द्विबाहुः।

गोत्रे रम्ये बहुविधगुणे काश्यपाख्ये प्रसूतः

कालिङ्गाख्ये विषयजनितः प्राङ्मुखः पद्महस्तः॥

पद्मासनः पद्मकरो द्विबाहुः पद्मद्युतिः सप्ततुरङ्गवाहः।

दिवाकरो लोकगुरुः किरीटी मयि प्रसादं विदधातु देवः॥

अथादित्यहृदयं स्तोत्रम् ॥

ततो युद्धपरिश्रान्तं समरे चिन्तया स्थितम् ।
रावणं चाग्रतो दृष्ट्वा युद्धाय समुपस्थितम् ।
दैवतैश्च समागम्य द्रष्टुमभ्यागतो रणम् ।
उपगम्याब्रवीद्राममगस्त्यो भगवानृषिः ॥
राम राम महाबाहो शृणु गुह्यं सनातनम् ।
येन सर्वानरीन् वत्स समरे विजयिष्यसि ॥
आदित्यहृदयं पुण्यं सर्वशत्रुविनाशनम् ।
जयावहं जपेन्नित्यमक्षय्यं परमं शिवम् ॥
सर्वमङ्गलमाङ्गल्यं सर्वपापप्रणाशनम् ।
चिन्ताशोकप्रशमनमायुर्वर्धनमुत्तमम् ॥

रश्मिमन्तं समुद्यन्तं देवासुरनमस्कृतम् ।
पूजयस्व विवस्वन्तं भास्करं भुवनेश्वरम् ॥
सर्वदेवात्मको ह्येष तेजस्वी रश्मिभावनः ।
एष देवासुरगणान् लोकान् पाति गभस्तिभिः ॥
एष ब्रह्मा च विष्णुश्च शिवः स्कन्दः प्रजापतिः ।
महेन्द्रो धनदः कालो यमः सोमो ह्यपां पतिः ॥
पितरो वसवः साध्या ह्यश्विनौ मरुतो मनुः ।
वायुर्वन्हिः प्रजाः प्राणा ऋतुकर्ता प्रभाकरः ॥
आदित्यः सविता सूर्यः खगः पूषा गभस्तिमान् ।
सुवर्णसदृशो भानुः स्वर्णरेता दिवाकरः ॥
हरिदश्वः सहस्रार्चिः सप्तसप्तिर्मरीचिमान् ।

तिमिरोन्मथनः शम्भुस्त्वष्टा मार्ताण्ड अंशुमान् ॥
हिरण्यगर्भः शिशिरस्तपनो भास्करो रविः।
अग्निगर्भोऽदितेः पुत्रः शङ्खः शिशिरनाशनः ॥
व्योमनाथस्तमोभेदी ऋग्यजुस्सामपारगः।
घनवृष्टिरपां मित्रो विन्ध्यवीथी प्लवङ्गमः ॥
आतपी मण्डली मृत्युः पिङ्गलः सर्वतापनः।
कविर्विश्वो महातेजा रक्तः सर्वभवोद्भवः ॥
नक्षत्रग्रहताराणामधिपो विश्वभावनः।
तेजसामपि तेजस्वी द्वादशात्मन् नमोऽस्तु ते ॥
नमः पूर्वाय गिरये पश्चिमायाद्रये नमः।
ज्योतिर्गणानां पतये दिनाधिपतये नमः ॥

जयाय जयभद्राय हर्यश्वाय नमो नमः।
नमो नमः सहस्रांशो आदित्याय नमो नमः॥
नम उग्राय वीराय सारङ्गाय नमो नमः।
नमः पद्मप्रबोधाय मार्ताण्डाय नमो नमः॥
ब्रह्मेशानाच्युतेशाय सूर्यायादित्यवर्चसे।
भास्वते सर्वभक्षाय रौद्राय वपुषे नमः॥
तमोघ्नाय हिमघ्नाय शत्रुघ्नायामितात्मने।
कृतघ्नघ्नाय देवाय ज्योतिषां पतये नमः॥
तप्तचामीकराभाय वन्हये विश्वकर्मणे।
नमस्तमोऽभिनिघ्नाय रुचये लोकसाक्षिणे॥
नाशयत्येष वै भूतं तथैव सृजति प्रभुः।

पायत्येष तपत्येष वर्षत्येष गभस्तिभिः ॥
एष सुप्तेषु जागर्ति भूतेषु परिनिष्ठितः ।
एष चैवाग्निहोत्रं च फलं चैवाग्निहोत्रिणाम् ॥
वेदाश्च क्रतवश्चैव क्रतूनां फलमेव च ।
यानि कृत्यानि लोकेषु सर्व एष रविः प्रभुः ॥
एनमापत्सु कृच्छ्रेषु कान्तारेषु भयेषु च ।
कीर्तयन् पुरुषः कश्चिन्नावसीदति राघव ॥
पूजयस्वैनमेकाग्रो देवदेवं जगत्पतिम् ।
एतत्त्रिगुणितं जप्त्वा युद्धेषु विजयिष्यसि ॥
अस्मिन् क्षणे महाबाहो रावणं त्वं वधिष्यसि ।
एवमुक्त्वा तदागस्त्यो जगाम च यथागतम् ॥

एतच्छ्रुत्वा महातेजा नष्टशोकोऽभवत्तदा ।
धारयामास सुप्रीतो राघवः प्रयतात्मवान् ॥
आदित्यं प्रेक्ष्य जप्त्वा तु परं हर्षमवाप्तवान् ।
त्रिराचम्य शुचिर्भूत्वा धनुरादाय वीर्यवान् ॥
रावणं प्रेक्ष्य हृष्टात्मा युद्धाय समुपागमत् ।
सर्वयत्नेन महता वधे तस्य धृतोऽभवत् ॥
अथ रविरवदन्निरीक्ष्य रामं
मुदितमनाः परमं प्रहृष्यमाणः ।
निशिचरपतिसंक्षयं विदित्वा
सुरगणमध्यगतो वचस्त्वरेति ॥

इतिश्रीमद्रामायणे युद्धकाण्डे आदित्यहृदयनामा सर्गः समाप्तः ॥

मेरुमन्दरसङ्काशं पीताम्बरधरं विभुम् ।
किरीटिनं पद्महस्तं भास्करं प्रणमाम्यहम् ॥
उदयगिरिमुपेतं भास्करं पद्महस्तं
सकलभुवननेत्रं नूत्नरत्नोपधेयम् ।
तिमिरकरिमृगेन्द्रं बोधकं पद्मिनीनां
सुरवरमभिवन्दे सुन्दरं विश्वरूपम् ॥

या देवी मधुकैटभप्रशमनी या माहिषोन्मूलिनी
या धूम्रेक्षणचण्डमुण्डदमनी या रक्तबीजाशनी ।
या शुम्भादिनिशुम्भदैत्यशमनी या सिद्धलक्ष्मी परा
सा चण्डी नवकोटिशक्तिसहिता मां पातु विश्वेश्वरी ॥
ब्राह्मी वारिरुहेन्दुसौम्यवदना माहेश्वरी लीलया
कौमारी रिपुवर्गनाशनकरी चक्रायुधा वैष्णवी ।
वाराही घनघोरघर्घरस्वाप्यैन्द्री च वज्रायुधा
चामुण्डा गणनाथरुद्रसहिता रक्षन्तु मां मातरः ॥
विद्यात्मानमशेषलोकजननीं देवीमिमामिष्टदा -
मिच्छग[illegible]कलितभूषणां त्रिणयनां वन्देऽनवद्यां सदा ।
भक्त्या नम्रसुरासुरेन्द्रमुकुटप्रत्यग्ररत्नाङ्कुर -
च्छगयारञ्जितपादपीठयुगलामिष्टार्थसम्पादिनीम् ॥

वन्दे मातरमम्बिकां भगवतीं वाणीरमासेवितां
कल्याणीं कमनीयकल्पलतिकां कैलासनाथप्रियाम् ।
वेदान्तप्रतिपाद्यमानविभवां विद्वन्मनोरञ्जिनीं
श्रीमच्चक्रान्चितरत्नपीठनिलयां श्रीराजराजेश्वरीम् ।
श्रीविद्यां जगतां धात्रीं सर्गस्थितिलयेश्वरीम् ।
नमामि ललितां नित्यं महात्रिपुरसुन्दरीम् ॥

माणिक्यवीणामुपलालयन्तीं
मदालसां मञ्जुलवाग्विलासाम् ।
माहेन्द्रनीलद्युतिकोमलाङ्गीं
मातङ्गकन्यां मनसा स्मरामि ॥

चतुर्भुजे चन्द्रकलावतंसे कुचोन्नते कुङ्कुमरागशोणे ।
पुण्ड्रेक्षुपाशाङ्कुशपुष्पबाणहस्ते नमस्ते जगदेकमातः ॥

माता मरकतश्यामा मातङ्गी मधुशालिनी ।
कुर्यात्कटाक्षं कल्याणी कदम्बवनवासिनी ॥
जय मातङ्गतनये जय नीलोत्पलद्युते ।
जय सङ्गीतरसिके जय लीलाशुकप्रिये ॥

॥ अथ श्यामलानवरत्नमालिकास्तोत्रम् ॥

ॐकारपञ्जरशुकीमुपनिषदुद्यानकेलिकलकण्ठीम् ।
आगमविपिनमयूरीमार्यामन्तर्विभावये गौरीम् ॥ १॥
दयमानदीर्घनयनां देशिकरूपेण दर्शिताभ्युदयाम् ।
वामकुचनिहितवीणां वरदां सङ्गीतमातृकां वन्दे ॥ २ ॥
श्यामलिमसौकुमार्यां सौन्दर्यानन्दसम्पदुन्मेषाम् ।
तरुणिमकरुणापूरां मदजलकल्लोललोचनां वन्दे ॥ ३॥
नखमुखमुखरितवीणा-नादरसास्वादनवनवोल्लासम् ।

मुखमम्ब मोदयतु मां मुक्ताताटङ्कमुग्धहसितं ते ॥ ४॥
सरिगमपधनिरतां तां वीणासङ्क्रान्तकान्तहस्तां ताम्।
शान्तां मृदुलस्वान्तां कुचभरतान्तां नमामि शिवकान्ताम्॥
अवटुतटघटितचूली-ताडिततालीपलाशताटङ्काम्।
वीणावादनवेलाकम्पितशिरसं नमामि मातङ्गीम्॥ ६॥
मणिभङ्गमेचकाङ्गीं मातङ्गीं नौमि सिद्धमातङ्गीम्।
यौवनवनसारङ्गीं सङ्गीताम्भोरुहानुभवभृङ्गीम्॥७॥
वीणारवानुषङ्गं विकचमदामोदमाधुरीभृङ्गम्।
करुणापूरतरङ्गं कलये मातङ्गकन्यकापाङ्गम्॥८॥
मेचकमासेचनकं मिथ्यादृष्टान्तमध्यभागं ते।
मातः स्वरूपमनिशं मङ्गलसङ्गीतसौरभं मन्ये॥ ९॥
॥ इतिश्री श्यामलानवरत्नमालिका स्तोत्रं सम्पूर्णम्॥

वन्दे भारतीम् ।

सरलां मृदुलां रसभरमञ्जुलाम् ।
सर्वमङ्गलाम् । भारतीं वन्दे ०॥

सत्याहिंसानय पथ दर्शिनीम् ।
विश्वविजयपटु वैभव भारिणीम् ।
नयोन्नताम् । दिशि दिशि जाग्रताम् ।
ललितां, जननीं, भारतीम् । वन्दे ०॥

पीयूषायित भाषितशालिनीम् ।
चन्द्रकिरणसितसुषुमाधारिणीम् ।
यशस्विनीम् । अमरसरस्वतीम् ।
मधुरां, परमां, भारतीम् । वन्दे ०॥

रविर्नारायणस्तेजश्चन्द्रो नारायणो महः ।
वन्हिर्नारायणः साक्षान्नारायण नमोऽस्तु ते ॥

ध्येयः सदा सवितृमण्डलमध्यवर्ती नारायणः सरसिजासनसंनिविष्टः।
केयूरवान्मकरकुण्डलवान्किरीटी हारी हिरण्मयवपुर्धृतशङ्खचक्रः॥

यन्नाभीसरसीरुहान्तरपुटे भृङ्गायमाणो विधिः
यद्वक्षः कमलाविलाससदनं यच्चक्षुषी चेन्दिनौ ।
यत्पादाब्जविनिस्सृता सुरनदी शम्भोः शिरोभूषणं
यन्नामस्मरणं धुनोति दुरितं पायात्स नः केशवः॥

कल्याणानां त्वमसि महसां भाजनं विश्वमूर्ते
धुर्यां लक्ष्मीमिह मयि भृशं धेहि देव प्रसीद।
यद्यत्पापं प्रतिजहि जगन्नाथ नम्रस्य तन्मे
भद्रं भद्रं वितर भगवन् भूयसे मङ्गलाय॥